# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – साहित्यम् (नाट्यवर्गः)** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – नाट्यदर्पणः ३-४ विवेकौ** | |

**सूचना -** **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १** **अधोलिखितेषु द्वयोः कारिकयोः व्याख्या कार्या।**

१ जुगुप्सनीयरूपादि परश्लाघासमुद्भवः।
बीभत्सोऽभिनयनश्चास्य निष्ठेवोद्वेगनिन्दनैः॥

२ संसारभयवैराग्यतत्त्वशास्त्रविमर्शनैः।
शान्तोऽभिनयनं तस्य क्षमाध्यानोपकारतः॥

३ सात्त्विकः स्वरभेदादेः अनुभावस्य दर्शनम्।
वर्णाद्यनुक्रियाऽऽहार्यः बाह्यवस्तुनिमित्तकः॥

४ अश्रु नेत्राम्बुजशोकाद्यैः नासास्पन्दाक्षिरुक्षणैः।
मूर्छनं घातकोपाद्यैः स्वग्लानिर्भूमिपातकृत्॥

**प्रश्नः २** नाट्यमातॄः यथाग्रन्थं विवेचयत।

**प्रश्नः ३** करुणरसनिरूपणं यथाग्रन्थं विवर्णयत।

**प्रश्नः ४** यथाग्रन्थं रसदोषान् प्रतिपादयत।

**प्रश्नः ५** व्यभिचारिभावान् सलक्षणोदाहरणं विवेचयत।

**प्रश्नः ६** **अधोलिखितेषु द्वयोः कारिकयोः व्याख्या कार्या।**

१ शरण्यो दक्षिणस्त्यागी लोकशास्त्रविचक्षणः।
गाम्भीर्य-धैर्य-शौण्डीर्य-न्यायवानुत्तमः पुमान्॥

२ पितापुत्राभिधायोगैर्मुख्या देव्यपि राजभिः।
विदूषकेण भवती राज्ञीचेट्यौ नृपस्त्रियः॥

३ प्रवेश-निष्क्रमाक्षेप-प्रसादान्तर-सङ्गतम् ।
चित्रार्थं रूपकं गेयं पञ्चधा स्यात् कविध्रुवा ॥

४ शूरे विक्रमसंसूचि कल्प्यं नामाथ वाणिजे ।
दत्तान्तं प्रायशो विप्रे गोत्रकर्मानुरुप्यतः ॥

**प्रश्नः** ७ नायिकालक्षणं विलिख्य तद्भेदान् सलक्षणोदाहरणं विवेचयत ।

**प्रश्नः** ८ यथाधीतं नायिकालङ्कारान् विवर्णयत ।

**प्रश्नः** ९ नाट्ये भाषाप्रयोगं यथाग्रन्थं लिखत ।

**प्रश्नः** १० नाट्यप्रयोगे स्त्रीपात्राणां सम्बोधनविषये वर्णनं कुरुत ।

**प्रश्नः** ११ **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ नाट्यदर्पणरचयिता कः ?
२ नाट्यदर्पणे कति विवेकाः सन्ति ?
३ तृतीयविवेके कति कारिकाः सन्ति ?
४ तृतीयविवेकस्य नाम किम् ?
५ कति नाट्यमातरः ?
६ श्लाघारोमाञ्चहर्षतः कः रसः अनुभूयते ?
७ चिन्तायाः किं लक्षणम् ?
८ नान्दीलक्षणं लिखत ।
९ नाटके ब्राह्मणभार्या केन नाम्ना निर्दिश्यते ?
१० चतुर्थविवेके कति कारिकाः सन्ति ?
११ चतुर्थविवेकस्य किन्नाम ?
१२ अभिनयः कतिविधः ?
१३ स्वेदस्य लक्षणं किम् ?
१४ राज्ञा विदूषकः कैः शब्दैः सम्बोध्यः ?
१५ हास्यरसः कतिविधः ?

****